# પ્રણામપ્રણયાખ્યસ્તવઃ

Pranamapranayakhyastavah

sanskritdocuments.org

February 23, 2019

# Pranamapranayakhyastavah

# પ્રણામપ્રણયાખ્યસ્તવઃ

## Sanskrit Document Information

Text title : praNAmapraNayAkhyastavaH

File name : praNAmapraNayAkhyastavaH.itx

Category : vishhnu, krishna, rUpagosvAmin, stavamAlA

Location : doc_vishhnu

Author : Rupagoswami

Transliterated by : Jan Brzezinski (Jagadananda Das) jankbrz at yahoo.com and Neal Delmonico (Nitai Das) ndelmonico at sbcglobal.net

Description/comments : From stavamAlA (rUpagosvAmivirachitA) Garland of Devotional Prayers stavamAlA

Acknowledge-Permission: http://granthamandira.net Gaudiya Grantha Mandira

Latest update : February 22, 2019

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

February 23, 2019

*sanskritdocuments.org*

# પ્રણામપ્રણયાખ્યસ્તવઃ

શ્રીકૃષ્ણાય નમઃ ।
કન્દર્પકોટિરમ્યાય સ્ફુરદિન્દીવરત્વિષે ।
જગન્મોહનલીલાય નમો ગોપેન્દ્રસૂનવે ॥ ૧॥

કૃષ્ણલાકૃતહારાય કૃષ્ણલાવણ્યશાલિને ।
કૃષ્ણાકૂલકરીન્દ્રાય કૃષ્ણાય કરવૈ નમઃ ॥ ૨॥

સર્વાનન્દકદમ્બાય કન્દમ્બકુસુમસ્રજે ।
નમઃ પ્રેમાવલમ્બાય પ્રલમ્બારિકનીયસે ॥ ૩॥

કુણ્ડલસ્ફુરદંસાય વંશાયત્તમુખશ્રિયે ।
રાધામાનસહંસાય વ્રજોત્તંસાય તે નમઃ ॥ ૪॥

નમઃ શિખણ્ડચૂડાય દણ્ડમણ્ડિતપાણયે ।
કુણ્ડલીકૃતપુષ્પાય પુણ્ડરીકેક્ષણાય તે ॥ ૫॥

રાધિકાપ્રેમમાધ્વીકમાધુરીમુદિતાન્તરમ્ ।
કન્દર્પવૃન્દસૌન્દર્યં ગોવિન્દમભિવાદયે ॥ ૬॥

શૃઙ્ગારરસશૃઙ્ગારં કર્ણિકારાત્તકર્ણિકમ્ ।
વન્દે શ્રિયા નવાભ્રાણાં બિભ્રાણં વિભ્રમં હરિમ્ ॥ ૭॥

સાધ્વીમણિવ્રાતપશ્યતોહરવેણવે ।
કહ્લારકૃતચૂડાય શઙ્ખચૂડભિદે નમઃ ॥ ૮॥

રાધિકાધરબન્ધૂકમકરન્દમધુવ્રતમ્ ।
દૈત્યસિન્ધુરપારીન્દ્રં વન્દે ગોપેન્દ્રનન્દનમ્ ॥ ૯॥

બર્હેન્દ્રાયુધરમ્યાય જગજ્જીવનદાયિને ।
રાધાવિદ્યુદ્વૃતાઙ્ગાય કૃષ્ણામ્ભોદાય તે નમઃ ॥ ૧૦॥

પ્રેમાન્ધવલ્લવીવૃન્દલોચનેન્દ્રીવરેન્દવે ।

કાશ્મીરતિલકાઢ્યાય નમઃ પીતામ્બરાય તે ॥ ૧૧॥

ગીર્વાણેશમદોદ્દામ દાવનિર્વાણનીરદમ્ ।
કન્દૂકીકૃતશૈલેન્દ્રં વન્દે ગોકુલબાન્ધવમ્ ॥ ૧૨॥

દૈન્યાર્ણવે નિમગ્નોઽસ્મિ મન્તુગ્રાવભરાર્દિતઃ ।
દુષ્ટે કારુણ્યપારીણ મયિ કૃષ્ણ કૃપાં કુરુ ॥ ૧૩॥

આધારોઽપ્યપરાધાનામવિવેકહતોઽપ્યહમ્ ।
ત્વત્કારુણ્યપ્રતીક્ષોઽસ્મિ પ્રસીદ મયિ માધવ ॥ ૧૪॥

ઇતિ શ્રીરૂપગોસ્વામિવિરચિતસ્તવમાલાયાં પ્રણામપ્રણયાખ્યઃ સ્તવઃ સમ્પૂર્ણઃ ।

---

*Pranamapranayakhyastavah*

pdf was typeset on February 23, 2019

Please send corrections to *sanskrit@cheerful.com*